# भार्गवीयमहाकाव्यस्य  काव्यशास्त्रीयं वैशिष्ट्यम्

**सनन्दनकुमारत्रिपाठी**

विविधवाच्यवाचकरचनाप्रपञ्चचारुण्यतिविचित्रकविपरम्परावाहिनि संस्कतसाहित्यम् आवाल्मीकेरारभ्येदानीं यावत् संस्कतकाव्यसुधाधारा निरन्तरं प्रवहति, यत्रानेकानि काव्यानि विरचितानि विरच्यन्ते च। यथा– आदिकवेर्वाल्मीकेः श्रीमद्वाल्मीकीयरामायणं, कविकुलगुरोः कालिदासस्य रघुवंशं, महाकविभारवेः किरातार्जुनीयं, महाकवेर्माघस्य शिशुपालवधं, महाकवेःश्रीहर्षस्य नैषधीयचरितञ्चेत्यादि। सन्त्यद्यतनकविविरचितानि संस्कतमहाकाव्यान्यपि बहूनि। यथा–पण्डितश्रीरामचन्द्रमिश्रकतं वैदेही–चरितं, डॉ.सत्यव्रतशास्त्रिविरचितमिन्दिरागान्धिचरितं, डॉ.रेवाप्रसाद–द्विवेदिनोपनिबद्धं सीताचरितञ्चेत्यादि। राष्ट्रियसंस्कतसंस्थानस्य मानित–विश्वविद्यालयस्य कुलपतीनां प्रो. राधावल्लभत्रिपाठिमहोदयानां काव्यनाटकोपन्यासादयो बहवश्चमत्कारिणो ग्रन्थाः प्रकाशमाप्ताः, तेषां कालिदासपुरस्कारविभूषितं लहरीदशकं नितान्तं सह्रदयह्रदयावर्जकम्। प्रो. अभिराजराजेन्द्रमिश्रकतानि विराजन्ते बहूनि महाकाव्यानि खण्डकाव्यानि च चमत्कारावहानि। डॉ. रामकुमारशर्मविरचितं भरतचरितं रसगुणालङ्कारादि–काव्यतत्त्वविनियोगदशा विद्वन्मनोरञ्जकं पाण्डित्यपूर्णं महाकाव्यम्। एवमनेके संस्कतकवयो धुना पि काव्यनाटकोपन्यासादिलेखने बद्धपरिकरा विलसन्ति। एतादशा धुनिककाव्यप्रणेतष्वन्यतमा विविधनवद्यविद्याविशारदाः श्रीमद्रामचन्द्रचरणारविन्दभङ्गायमाणाः श्रीमद्भागवतादिपुराणार्णवप्रमथन–मन्दरायमाणाः कविमूर्द्धन्या वदतां वरेण्या उज्जयिनीस्थकालिदास–संस्कताकादम्या निदेशकाः प्रो.मिथिलाप्रसादत्रिपाठिनः । कविवरैरेतैर्भार्गवीयं नाम महाकाव्यमुपनिबद्धं, यद् हि न्यू भारतीय बुक् कार्पोरेशन–दिल्लीतः २००८तमे खीष्टाब्दे प्रकाशमानीतम्। महाकाव्यस्यास्य काव्यशास्त्रीयं वैशिष्ट्यं मम शोधपत्रस्य विषयः।

एतादशमाधुनिकं संस्कतकाव्यं त्रिधा विभक्तुं शक्यते। तत्र प्रथमं पारम्परिकं यत्र पुरातनी कथा वर्णिता, किन्तु कल्पनया नवीनीकता च। एषा परम्परा शास्त्रानुसारिणी। नवीना धुनिकघटनाः समाश्रित्य रच्यमाना काव्यधारा द्वितीया। अत्र सम्प्रति जायमानानां घटनानां छन्दोबद्धपद्येन वर्णनम्। ततीया काव्यधारा सा या छन्दोविहीना स्वतन्त्रा क्वचित् परित्यक्तव्याकरणादिशास्त्रनियमा च। एतासु त्रिविधकाव्यधारासु भार्गवीय–महाकाव्यं प्रथमधारायां निपतति। अस्य महाकाव्यस्य कविपरिचयेन सह

महाकाव्यलक्षणध्वनिगुणालङ्कारवरीतिरूपकाव्यशास्त्रीयतत्त्वानां ग्रन्थान्तर–प्रभावस्य च दष्ट्या वैशिष्ट्यमत्र प्रदर्श्यते–

**१.कविपरिचयः-** अस्य महाकाव्यस्य प्रणेतारौ मध्यप्रदेशस्य रीवामण्डले भस्माख्ये ग्रामे लब्धजन्मानः (जन्मतिथिः गुरुवारः वि.सं.२००७) वाराणसीस्थ–सम्पूर्णानन्दसंस्कतविश्वविद्यालयत उत्तीर्णाचार्यपरीक्षाः, एम्.ए. परीक्षामुत्तीर्णाः, लब्धविद्यावारिध्युपाधयः(Ph.D.), विद्यावाचस्पतयः(D.Litt.), हिन्द्यामपि एम्.ए.,पी–एच.डी. इत्युपाधि लब्ध्वन्तः, प्रयागतः प्राप्तायुर्वेद–रत्नोपाध्यायः प्रो. मिथिलाप्रसादत्रिपाठिनो विद्यन्ते। एतैः सर्वोच्चाङ्कोपलब्ध्ये त्रीणि स्वर्णपदकानि द्वे रजतपदके चा धिगतानि। इमे नैकाभिः संस्थाभिर्विश्वविद्यालयैश्च विविधसम्मानेन विभूषिताः। भवन्तो मध्यप्रदेशस्य इन्दौरनगरे देवी अहिल्याविश्वविद्यालये तुलनात्मकभाषा एवं संस्कतिविभागे आचार्या अध्यक्षाश्च व्यराजन्त। इदानीं कालिदाससंस्कताकादम्या–मुज्जयिन्यां मध्यप्रदेशे निदेशकपदमलङ्कुर्वन्ति। सम्प्रति भवतां निवासो मध्यप्रदेशस्य इन्दौरनगरस्य वैशालीनगरखण्डे विराजते। श्रीमद्वैष्णव–भूषणानामनेकशास्त्रकोविदानां भवतां श्रीमद्रामचन्द्रचरणारविन्देष्वगाधा श्रद्धा भक्तिश्च। विद्वच्छिरोमणीनां भवतां भार्गवीयमहाकाव्यातिरिक्ता–न्यनेकानि काव्यानि प्रकाशितानि सन्ति। यथा–सतनामिगौरवं, भावमाला, राष्ट्रशतकं. केशवशतकं, सपादशतकं, शब्दाञ्जलिः, माधवीयं, मयङ्कशतकम्. भारतीमहिम्नःस्तोत्रं, हनुमन्महिम्नःस्तोत्रं, जानकीमहिम्नः–स्तोत्रं च। एतदतिरिक्ता अन्ये ग्रन्था इमे सन्ति–श्रीरामभक्ति का विकास, वाल्मीकिरामायण और प्राकत–अपभ्रंश, रामकाव्य तुलसीसाहित्य के रामकथन। एवमन्ये पि शोधनिबन्धः पत्रपत्रिकासु प्रकाशिताः। भवद्भिः राष्ट्रियेष्वन्ताराष्ट्रियेषु चा नेकेषु संस्कतसम्मेलनेषु गोष्ठीषु कार्यशालासु च भागं गहीत्वा शोधपत्राणि वाचितानि विश्वविद्यालयप्रतिनिधित्वञ्च निर्व्यूढम्। भवतां पर्यवेक्षकत्वे प्रायशस्त्रिंशदधिकाः शोधर्थिनो विद्यावारिधिम् (Ph.D.) उपाधिं लब्ध्वन्तः। भवन्तः सर्वदैव संस्कतसाहित्यस्य संरक्षणे संवर्धने च व्यापतास्तिष्ठन्ति।

**२.महाकाव्यलक्षणसमन्वयः**– महाकाव्यस्य समग्रं लक्षणं कविराजविश्वनाथस्य सहित्यदर्पणे लभ्यते। तदनुसारेण महाकाव्ये सर्गबन्धः, प्रसिद्धं कथावस्तु, कुलीनधीरोदात्तनायक एकः, क्वचित्तु तादशा

बहवो नायकाः, श्रङ्गारवीरशान्तानामन्यतमो ङ्गी रसः, शेषा अङ्गभूता रसाः, नातिह्रस्वानां नातिदीर्घाणामेकवत्तमयानाम्प्रयुक्तनानावत्तानां वा सर्गाणामल्पिष्ठा संख्या ष्टौ। एकस्मिन् सर्गे प्रायेणैकस्य वत्तस्य प्रयोगः, सर्गान्ते वत्तपरिवर्त्तनं, भाविकथासंसूचनं, सन्ध्यासूर्येन्दूदयोपरागादीनां वर्णनम्, पञ्चसन्धीनां विन्यासश्चेति भवन्ति।[1]

भार्गवीयं रचनारीत्या रघुवंशमनुकरोति। यथा रघुवंशे नैके नायकास्तथा स्मिन्नपि भगुच्यवनस्थूलकेशशौनकशुक्रमार्कण्डेय–दधीच्यौर्वऋचीकजमदग्निपरशुरामप्रभतयो नैके नायकाः। तत्र परशुरामस्य प्राधान्यम्। सप्तमसर्गे सूर्यास्ताश्रमादिवर्णनं, धर्मः फलं, वीररसो ङ्गी, अन्ये ङ्गभूताःश्रङ्गारकरुणभयानकादयः। अत्र वसन्ततिलका, इन्द्रवज्रा, उपेन्द्रवज्रा, मालिनी, स्रग्विणी, शिखरिणी, द्रुतविलम्बितम्, उपजातिः, पञ्चचामरम्, वंशस्थम्, वियोगिनी, भुजङ्गप्रयातम्, वैश्वदेवीत्येतच्छन्दसां प्रयोगः। सर्गान्ते वत्तपरिवर्त्तनं भविकथासंसूचनम् च लभ्यते। महाकाव्ये स्मिन् नवत्यधिकषोडशशतम् (१६६०) पद्यानि विद्यन्ते। श्रीमद्भागवतादिपुराणवर्णितमितिवत्तमस्य महाकाव्यस्य कथावस्तुन आधारः। सर्गानुक्रमेणा स्मिन् महाकाव्ये वर्णितं कथावस्त्वेवं वर्तते–

महाकाव्ये स्मिन् प्रथमे सर्गे भगुचरितं, द्वितीये च्यवनजननं, ततीये च्यवनप्रभावः, चतुर्थे च्यवनचरितं, पञ्चमे रुरुचरितं, षष्ठे शुक्रचरितं, सप्तमे मार्कण्डेयानुचरितं, अष्टमे दधीचिचरितं, नवमे और्वचरितम्, दशमे जमदग्निवत्तवर्णनं, एकादशे परशुरामप्रभावः, द्वादशे परशुरामविद्याराधनं, त्रयोदशे रामपराक्रमः, चतुर्दशे रामविद्यागमः, पञ्चदशे जमदग्निकोपः, षोडशे जमदग्निचरितं, सप्तदशे परशुरामाशीर्वादप्राप्तिः, अष्टादशे कार्तवीर्याचरणं, ऊनविंशे सुचन्द्रवधः, विंशे कार्तवीर्यवधः, एकविंशे गणपतिसख्यं, द्वाविंशे जमदग्निसंस्कारः, त्रयोविंशे परशुराममखः, चतुर्विंशे रामक्षेत्रनिर्माणं, पञ्चविंशे रामक्षेत्रवर्णनं, षड्विंशे परशुरामकतं नवदेशनिर्माणं, सप्तविंशे अम्बाचरितम्, अष्टाविंशे गुरुशिष्यसंगरः, एकोनत्रिंशे रामविद्याप्रदानं, त्रिंशे श्रीविद्याग्रहणम्, एकत्रिंशे रामरामयोः समागमः, द्वात्रिंशे परशुरामस्तुतिश्चेति विषया मुख्यरूपेणवर्णिताः।

अत्र विकीर्णानां भगुवंशकथनामेकत्र मेलनं परमरुचिकरम्। पुरातनमपीतिवत्तं कविप्रतिभोल्लिखितत्वेन नूतनत्वं बिभर्ति। स्वस्य समाजस्य देशस्य विश्वस्य चाभ्युदये कोपो पि परमावश्यकः। रेणुकायां व्यभिचारमाशङ्क्य कुपितो जमदग्निः चतुरः पुत्रान् रेणुकायाः

शिरश्च्छेत्तुमादिशति, तैरकरणे तान् निहन्ति च। यदा परशुरामेण जननीशिरश्छित्त्वा जमदग्निः प्रसादितस्तदा सौ कोपं सकलानर्थकं मत्त्वा परित्यजति। ततः कोपस्तं स्वं त्यक्तुं नादिशति। एतत्प्रसंगे जमदग्निकोपसंवादः कविना मन्ये स्वप्रतिभया कल्पितः। स रुचिकरः संवाद एवं वर्तते—

**मुनिकतामवलोक्य च तर्जनां सपदि कोप उवाच भगूद्वहम्।**
**श्रणु न को पि च कोपविवर्जितो भवति देहधरो भुवनत्रये।**
**भवति लोकगतिर्न मया विना जगदिदं ध्रियते कियते मया।**
**मखतपो खिलदानविधावहं भुवि भवामि सदा भगुनन्दन।।**
**परिनिशम्य मुनिः पुनरब्रवीत् त्यज कलेवरमाशु नशंस! मे।**
**व्रज सुदूरमितो न च मे रुचिस्त्वरय याहि तनोरथ दूरतः।।**[२]

एवं स्वस्यां सन्दिहानं जमदग्निं प्रति रेणुकाया उद्बोधनं कविप्रतिभाहेतुकम्, यत्र स्वकीयं पतिव्रतात्वं प्रमाणयन्ती रेणुका वदति यत् तद् गहं मतं भवति यत्र दम्पत्योः परस्परं सन्देहः। पतिदष्टौ गतचारित्रायाः सत्या अपि मरणमेव श्रेयः—

**शङ्का यदा भवति दम्पतिजा मिथश्च**
**स जीवनं भवति नैव गहं तदीयम्।**
**स्त्रीणां चरित्रविषये विमतिर्यदा स्यान्**
**मन्ये मतिर्वरमिहास्ति च जीवनाद्धि।।**[३]

एवं कविना पुरातने पि कथावस्तुनि नवीनकल्पना धानेन बहुत्र नवीनता पादिता। इत्थं भार्गवीयं महाकाव्यं कथादष्ट्याप्राचीनमपि नवत्वं बिभर्ति। अत इदं महाकाव्यं रघुवंशस्थानीयं मन्तुं शक्यते।

**३. ध्वनिसमन्वयः-** समासतो ध्वनिस्त्रिविधः—वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिश्च। तत्र रसध्वनिरेव काव्यस्या त्मा।[४] भार्गवीयमहाकाव्ये त्रिविधानामपि ध्वनीनां सद्भावः। तत्र रसध्वनेः प्राधान्यम्।

वस्तुध्वनिः—इह पद्यप्रकरणप्रबन्धादिव्यङ्ग्या वस्तुध्वनयो नैके विलसन्ति। यथा अधोलिखितपद्ये वस्तुध्वनिः —

**स्वदेशसेवार्थमिदं शरीरं गहं च वस्तुनि यदा जनानाम्।**
**भवन्ति राष्ट्रस्य समद्धिरिष्टा तदा भविष्यत्यभिवर्द्धमाना ।।**[५]

अत्र परशुरामस्य वचने राष्ट्रसेवा परमो धर्म इति सामान्यभूतं वस्तु ध्वन्यते। जमदग्निकोपसंवादे कोपो पि क्वचित् परमावश्यक इति वस्तु ध्वन्यते।[६] अधेलिखितपद्ये पि वस्तुध्वनिः—

**क्वाह च मन्दमतिकः क्व कवेर्यशश्च**
**भग्वन्वयार्णवमहो क्व च शेमुषी मे।**
**ध्यात्वा न्वयर्षिगुणरत्नमहं विलुब्धो**
**वा छामि पुण्यपुरुषाचरितानि चेतुम्।।**[७]

अत्र भग्वन्वयवर्णनमशक्यमिति वस्तु ध्वन्यते । एवमत्र ''राष्ट्रसेवा परमोधर्मः'', ''कोपो पि रक्षकः'',इत्यादयः प्रबन्धव्यङ्ग्या वस्तुध्वनयो पि सन्ति।

अलङ्कारध्वनिः – निम्नलिखितश्लोके विरोधाभासा लङ्कारध्वनिः–

**ब्रह्मण्यतो हरिपदं परिलभ्य लोके**
**यो राजसंसदि विभज्य पिनाकमुग्रम्।**
**सीतां श्रियं च निजचापमवाप भक्त्या**
**रामस्तुतः स शरणं मम रामचन्द्रः।।**[८]

अत्र चतुर्थपादे रामस्तुत इति पदे रामशब्दस्य दाशरथिरूपार्थग्रहणे विरोधः, यतो हि दाशरथिरूपो रामचन्द्रो दाशरथिनैव स्तुतो न भवति, किन्तु रामस्तुत इति पदस्थरामशब्दस्य परशुरामरूपार्थकरणे विरोधपरिहारः।

**रसध्वनिः-** अत्र श्रङ्गारकरुणवीरभयानकादयो रसा ध्वनिताः। तत्र वीरस्यैवाङ्गित्वम्, शेषास्तु रसा अङ्गभूताः। तत्र पञ्चमसर्गे श्रङ्गारे पि करुणविप्रलम्भो द्रष्टुं शक्यते। विश्वनाथमते करुणविप्रलम्भो पि श्रङ्गारस्य भेदः। तन्मते यूनोरन्य तरस्मिन् लोकान्तरं गतवत्यन्यतरस्य विमनायमानत्वे पुनरुभयोः संयोगे च सति करुणविप्रलम्भः स्वीक्रियते।[९] सर्पदंशेन प्रमदवरायां मतायां प्रमदवराविषयः रुरुवियोग एवं वर्णितः –

**सपदि ललितशीलां वीक्ष्य तां प्राणहीनां**
**रुरुरतिकरुणाभिः पीडितो भूद् द्विजानाम्।**
**सदसि मुनिवराणां सम्मुखे रोदनोत्को**
**मनसि कतनिवासां लोकमानो रुरोद।।**
**करुणभरितभावश्चिन्तयन् सर्पदष्टां**
**गहनवनगतो सौ शोकपूणेः शुशोच।**
**विलपति दयितां तां संस्मरन् चेष्टमानः**
**रुरुरपि ललनार्थं विह्वलो भूद् विषण्णः।।**
**कतगुरुजनसेवा राधितोग्रा तपस्या**
**यमनियमसमुत्थं सद्व्रतं दानकर्म।**

**यदि सुकतफलं मे संचितं पुण्यमिष्टं**
**सपदि भवतु युक्ता तेन जीव्यात् प्रिया मे।।**
**भगवति मम भक्तिर्यावती स्याच्च लोके**
**यदपि कतमशेषं पूर्वकाले पि पुण्यम्।**
**तदिह भवतु तन्व्या जीवितार्थ समन्ताद्**
**रुरुरिह बहु रोदित्याशया जीवनस्य।।**[१०]

अत्र सर्पदंशेन प्रमदवरायां मतायां रुरोर्विमनायमानता वर्णिता। यदा रुरुणा देवदूतवाक्येन स्वमायुषो र्द्धं प्रदीयते तदा प्रमदवरायां पुनरुज्जीवितायामुभयोः संयोगो भवति। एवमत्र करुणविप्रलम्भः। निम्नलिखितश्लोकेषु परशुरामस्य हतं जमदग्निमुद्दिश्य रेणुकां प्रति कथने करुणो द्रष्टुं शक्यते–

**वधादशेषभूभुजाममर्षशान्तिरिच्छिता**
**न लप्स्यते न चाप्तिरद्य मे पितुर्भविष्यति।**
**मयि स्थिते हतो पितेति मानसं दुनोति मे**
**वथा स्ति मे पराक्रमश्च वीर्यमुल्वणं मषा।।**
**वहिष्कतश्च कोप एव मे वशी पिता तदा**
**तपस्यया शमाय यत्नवानभूच्च केवलम्।**
**गहागतातिथेश्च पूजनं चकार तेन यत्**
**तथापि हिंसितो विमार्गगामिभिर्नपैः पिता।।**
**यदा तिथिश्च देवता भवत्यशेषभारते**
**सुपूजितः शुभत्वमेति धारणा पितुः शुभा।**
**निजाश्रमे सुपालितः तथापि संस्कतिर्हता**
**मुनिर्हतश्च धेनुसंस्कती हते रिभिस्तदा।।**
**स्खलद्वचांसि कण्ठरोधजानि शेकजान्यलं**
**निशम्य चात्मजस्य रेणुका भशं विमोहिता।**
**मुहुर्मुहुः पतिं विचिन्त्य शौर्यमीप्सितन्तथा**
**मुमोह सा बुबोघ वीक्ष्य भावविह्वलं सुतम्।।**[११]

अत्र निहतजमदग्निरूपालम्बनविभावेन तद्गुणस्मरणादिरूपोद्दीपन–विभावेन कण्ठरोधविलापाद्यनुभावेन स्मतिदैन्यविषादादिव्यभिचारिभावेन च परशुरामनिष्ठः शोको व्यज्यते। अन्त्यपद्ये रेणुकाया अपि अशोकस्या भिव्यक्तिः। यद्यपि दानदयायुद्धधर्मवीरत्वेन वीररसश्चतुर्धा।[१२] तथापि भार्गवीयमहाकाव्ये युद्धवीरस्य प्राधान्यम्। परशुरामादियुद्धवर्णने

रसस्यास्य भूयस्यभिव्यक्तिः, किन्तु दया वीरस्यापि महाकाव्ये – स्मिन्नुपलब्धिः। जालनिबद्धानां मत्स्यानां प्राणान् रक्षितुं च्यवनः स्वप्राणानपि त्यक्तुमुद्यतो भवति। अधोलिखितश्लोकयोर्दयावीरस्य ध्वनिः–

**निषादजालान्तरितः कदाचिद् मुनिश्च मीनैः सह बन्धने भूद्।**
**क्षमापयन् ते, प्रणताश्च बुद्ध्वा न मोक्षमिच्छत्यथ भार्गवो सौ।।**
**वसन्ति तोये सुहृदो झषाद्याः सुपाशबद्धा इह धीवरैस्ते।**
**मतिर्भवेद्वा नवजीवनं मे सहानुवत्स्यामि च तैर्जलीयैः।।**[१३]

च्यवनो मुनिर्जले तपस्यति स्म अतस्तस्य तज्जलनिवासिभिर्मीनैः सह मैत्री जाता। एकदा धीवराः जालेन मीनैः सह च्यवनमपि गहीतवन्तः। धीवरा मुनिं प्रणम्य क्षमां याचित्वा मुक्त्वा च मीनान् जिघक्षन्ति, किन्तु दयापरवशो मुनिः मीनैःसहैवात्ममोक्षमिच्छति। ततो विवादे जाते तत्रत्यो राजा मीनान् मुनिं च गां प्रदाय धीवरेभ्यो मोचयत्। अतो त्र च्यवनस्य दयाया अभिव्यक्तिरिति दयावीरत्वम्।

पुलोमराक्षसस्य समक्षं वह्नेरपि भयस्य वर्णनाद् भयानकस्य गन्धोविद्यते–

**भीतो पि वह्निर्गिरमाह सत्यां श्रुत्वा रुषा भूत्स वराहवेषः।**
**रक्षो मनोमारुतरंहसा तां साध्वीं जहारातिबलावलेपात्।।**[१४]

एवं भावध्वनयो पि बहुत्र लभ्यन्ते। सप्तमसर्गस्थनिम्नलिखितश्लोकेषु मार्कण्डेयस्य नारायणविषया रतिरभिव्यक्ता –

**नरं दिव्यं नारायणमुनिमवेक्ष्याशु पदयो-**
**र्ननामाविर्भूतं मुनियुगलमायातमभितः।**
**उद् ्चद्रोमाश्रुः प्रभुमपि विलोक्य प्रमुदितः**
**करौ बद्ध्वा नम्रः परिलुठति भूमौ नतिपरः।।**
**नतिर्दण्डाकारा श्रुतिमयवचोभिः स्तुतिविधा**
**वपू रोमा चालिं पुलकमिषमाधाय निभतम्।**
**प्रहर्षोद्रेकोत्थं नयनयुगलं चाश्रुभरितम् मुनेः**
**पश्यन् भक्तिं प्रभुरपि बभौ भक्तमतिकः।।**
**यमासेव्यं ध्यातुं विधिहरमुनीशाः स्तुतिरताः**
**यमाजप्यं गातुं व्यवसित-पुराणाः सनिगमाः।**
**यमालोक्यं भक्त्या सुरनरभवा योगनिरताः**
**स एवायं स्वामी मम मनसि वासी भवतु भो!।।**[१५]

एवमनेकस्थले रसभावध्वनिर्द्रष्टुं शक्यते। एवं विविधं ध्वनिं विभ्राणमिदं महाकाव्यमुत्तमम् ।

**४. गुणसमन्वयः-** माधुर्यौजःप्रसादाख्यास्त्रयोगुणाः प्रसिद्धाः।१६ भार्गवीयमहाकाव्ये प्रसादस्य प्राधान्यम्। अत्रत्याः शब्दाः श्रवणमात्रेण झटिति स्वार्थमर्पयन्तो रसं प्रकाशयन्ति। तत्र शब्दानां प्रसन्नता निम्नलिखितश्लोके द्रष्टुं शक्यते–

**श्रणु! मुनिवर! रोषो नात्र कार्यः कदापि**
**भुजगकुलमशेषं मारणे बद्धवैर!।**
**महिसुरधतशापा नैव ते नृन् दशन्ति**
**क्वचिदपि हतिमाप्ताः सर्वथा ते दशन्ति।।**[१७]

वीररौद्रादिरसवर्णने क्वचित् प्रसन्नशब्दा भिधेयो र्थः क्वचिच्छब्दश्चौजो व्यनक्ति। यथा–

**नपो मधे प्रस्वपनेषुणा ततो विनिद्रितांस्तान् प्रचकार भार्गवान्।**
**महाबलो वीक्ष्य सहोदरांस्तथा प्रबोधयित्वा[१८] समरे ययौ प्रभुः।।**[१९]

एवं श्रङ्गारकरुणादिरसस्थले माधुर्यमपि द्रष्टुं शक्यते।

**५. अलंकारयोजना-** शब्दार्थद्वारा रसस्य क्वचिदुपकारका अनुप्रासोपमादयो लंकाराः।[२०] भार्गवीये महाकाव्ये रससमाहितचेतसि स्वतः स्फुरन्तो पथग्यत्ननिर्वर्त्या नैके शब्दार्था लंकाराः। तत्र शब्दालंकारेषु–

**मदनमदनिविष्टो मोदमग्नस्तदा सौ**
**प्रमतिमतिमतिस्थं भार्गवं भूमिदेवम्।**
**पितरमपि मनोज्ञः श्रावयामास वत्तम्**
**सखिभिरथ सुशीलस्तत्सदाचारपूर्णः।।**[२१]

इत्यत्र 'मदनमदनिविष्टो मोद' इत्यत्र मकारदकारयोरसकदावत्या वत्यनुप्रासः, किञ्च 'प्रमतिमतिमतिस्थम्' इत्यत्र मतिशब्दस्य तदर्थस्य च पौनरुक्त्ये पि तात्पर्यमात्रेण भेदाल्लाटानुप्रासः ।

**प्रभो! पाह्याशाभिर्निगडितजनं मामशरणं**
**भवत्रासैस्त्रस्तं जननमरणाभ्यामव सदा।**
**कपावष्ट्या पारं नय विनयमाधेहि तरणे**
**कपासिन्धो!सिन्धोर्वरमिह न जाने गमय माम्।।**[२२]

अत्र सिन्धुशब्दस्य तदर्थस्य च पौनरुक्त्ये पि तात्पर्यमात्रेण भेदात् स एव–

**विनयतो नयतः प्रणयाद् प्रियम् निजपदाब्जनतं तनयं पुरः।**
**विनतकन्धरमाह विलोक्य तं जनिकरो जमदग्निमुनिस्तदा।।**[२३]

इत्यत्र नयतः नयत इत्यस्मिन् नकारयकारतकाराणां स्वरसहितानां क्रमिकावत्या यमकम्। तत्र विनयतः इति शब्दगतस्य नयत इति शब्दस्य निरर्थकत्वम्, अन्यस्य च सार्थकत्वाद् यमकालंकारश्चमत्कारावहः। अर्थालङ्कारेषु –

**मुनिरपि गततीरो दष्ट्वान् निम्नगायाः**
**नवशिशुमपि सद्यो जायमानां च कन्याम्।**
**सुरनिभतनुकान्तिं विभ्रतीं प्राक् विसष्टां**
**विजनवनगतां तां वल्लरीं वक्षहीनाम्।।**[२४]

अत्र सुरनिभतनुकान्तिमित्यत्रोपमा।

**यथान्धकारे शुशुभे सुदीपः भानुःप्रभाते च शशी प्रदोषे।**
**बहस्पतिर्बुद्धिमतां सभायां तथा जनिर्भाति च भार्गवस्य।।**[२५]

अत्रोपमेयभूताया जनेः सुदीपशशिबहस्पतिरूपानेकोपमानवर्णनान्मालोपमा।

**यथा शशी स्यात्तिलकायमानो ललाटलग्नश्च निशातरुण्याः।**
**पयोधितः पूतमना मयंको जज्ञे तथा भार्गववंशचन्द्रः।।**[२६]

इत्यत्रापि सैव।

**तपस्वी स्वाध्यायी शिशुवयसि विद्यार्जनमतिः**
**पितुर्विद्यामूर्तेरखिलनिगमानङ्गसहितान्।**
**अधीत्यान्यान्धर्मानपि पठितवान् शास्त्रनिकरान्**
**बभौ दीपाद् दीपः प्रकटित इवायं मुनिवटुः।।**[२७]

अत्र मुनिवटुर्दीपप्रभवदीपेनोपमितः अतो त्रोपममा चमत्कारावहा।

**मुनिरपि गततीरो दष्टवान् निम्नगायाः**
**नवशिशुमपि सद्यो जायमानां च कन्याम्।**
**सुरनिभतनुकान्तिं बिभ्रतीं प्राक् विसष्टां**
**विजनवनगतां तां वल्लरीं वक्षहीनाम्।।**[२८]

इत्यत्र कन्यायां वक्षहीनवल्लरीत्वारोपाद् रूपकम्।

**भवति जगति कश्चित्पच्छको नैव यस्य**
**रचयति नहि कश्चिद् यत्कते क्षेमयोगौ।**
**भवति सपदि कश्चिद्रक्षको नैव यस्य**
**तमिह झटिति पातुं प्रोद्यताः सन्ति सन्तः।।**[२९]

इत्यत्रा प्रस्तुतसत्सामान्यस्य वर्णनेन प्रस्तुतस्य स्थूलकेशस्य प्रतीत्या, अप्रस्तुता सहायसामान्यस्य वर्णनात् प्रस्तुता सहायप्रमदवरारूपविशेषस्य प्रतीतेरप्रस्तुतप्रशंसा।

**कामार्दितो राक्षसवत्तिमूढः कर्तव्यबोधोपहतस्तदानीम्।**
**तां संजिहीर्षुर्मुमुदे स सम्यक् पापाध्वगः को न जहर्ष पूर्वम्।।**[३०]

इत्यादौ पुलोमामवलोक्य हरिष्यतः हृष्यतः पापिविशेषस्य पुलोमराक्षस्य चतुर्थचरणप्रतिपाद्ये पापिसामान्यवर्णनेन समर्थनादर्थान्तरन्यासः–

**रणकलानिपुणो पि विचक्षणो महिसुरो पि युधिष्ठिरतां ययौ।**
**हरिरलोकयदस्य गुणाढ्यतां स्वयमदादथ वैष्णवकार्मुकम्।।**
**शमितवत्तिरभूच्च तपोधनः विजितवत्तिरभूद् विजयी रणे।**
**वहति शास्त्रकला अधिशस्त्रजा जयति चौर्वमुनिर्बहुविद्यया।।**[३१]

अत्र रणकलानिपुणो पि विचक्षणः महीसुरो पि युधिष्ठिरतां क्षत्रियतां ययाविति विरोधः, तस्य च ब्रह्मक्षत्रयोस्तेजोद्वयस्यैकत्र योगेन वीरो प्यसौ विद्वान् ब्राह्मणः सन्नपि युधिष्ठिरतां ययावित्यर्थकरणे विरोधपरिहारः। किञ्च वजितवत्तिरित्यत्र विगता जितवत्तिः यस्य स इत्यर्थकरणे शमितवत्तिरिति प्रतिपाद्यार्थेन सह विरोधः। विजिताः सकला वत्तयो येनेत्यर्थकरणे तत्परिहारः। अतो त्र विरोधाभासः।

**इत्थं च शाल्वनपतिर्गिरिशं विजेतुं**
**कत्वा मतिं गिरिपतिं प्रति यातुकामः।**
**दीपद्युतिं ननु विलोक्य रुषा पतङ्गाः**
**नाशाय वेगसहिता निपतन्ति नूनम्।।**[३२]

इह दीपद्युतिपत योःगिरिशशाल्वनपयोश्च बिम्बप्रतिबिम्बभावेन दष्टान्तः।

**क्वाह च मन्दमतिकः क्व कवेर्यशश्च**
**भग्वन्वयार्णवमहो क्व च शेमुषी मे।**
**ध्यात्वा न्वयर्षिगुणरत्नमहं विलुब्धे**
**वा छामि पुण्यपुरुषाचरितानि चेतुम्।।**[३३]

अत्रा ल्पया शेमुष्या भगुवंशवर्णनं तथैव कर्तुमशक्यं यथा ल्पसाध्नेनोडुपादिना समुद्रतरणमिति प्रतीत्या निदर्शना च द्रष्टुं शक्यते। एवमत्र नैके लङ्कारा: प्रयुक्तास्तथाप्यर्थान्तरन्यासस्य विनियोगे वैशिष्ट्यम् ।

६. **रीतिसमन्वयः-** अलङ्कारशास्त्रे वैदर्भी गौडी पाञ्चालीति तिस्रो रीतयः प्रसिद्धाः। तत्र भार्गवीयमहाकाव्ये वैदर्भ्याः प्राधान्यम्। अत्र समासरहितानां स्वल्पसमासानां वा ललितपदानां विन्यासश्चित्तावर्जकः। यथा–

**मधुरिमा मुनिमोहमदा चिता मदयतीव च सत्यवतीतनौ।**
**मदिरवीक्षणतः सुविलासितां जनयतीव मुहुःस्मितमातनोत्।।**
**यदुरुयुग्मगतं पुरुचिन्तितं तदुरुसंभवमानसहर्षणम्।**
**यदुरुकेलिरतं निभतं रतं तदुरुबोध्तयाविरतं रतम्।।**[३४]

इत्थं वैदर्भीप्रधानं प्रायेण समस्तं काव्यम्।

७. **ग्रन्थान्तरप्रभावः-** किमपि काव्यं कवेः प्रतिभां व्युत्पत्तिं वा व्यनक्ति। काव्यकारणत्वेन व्युत्पत्तिरपि स्वीकता। इयं हि विविधलोकशास्त्र–काव्याध्ययनजन्या। भार्गवीयमहाकाव्यावलोकनेन श्रीमतां प्रो. मिथिला–प्रसादत्रिपाठिनां श्रीमद्भागवतादिपुराणनां रामायणादिमहाकाव्यानां विविधशास्त्राणां च प्रगाढा व्युत्पत्तिः प्रतीयते। भार्गवीयमहाकाव्यस्य श्लोकेषु नैकत्र भागवतरामायणनैषधीयचरितशाकुन्तलादिग्रन्थानां प्रभावो क्षरशो – र्थतश्च दश्यते। तत् समासतः क्रमेणैवं द्रष्टुं शक्यते–

भार्गवीयमहाकाव्ये–

**क्वाह च मन्दमतिकः क्व कवेर्यशश्च**
**भग्वन्वयार्णवमहो क्व च शेमुषी मे।**
**ध्यात्वा न्वयर्षिगुणरत्नमहं विलुब्धो**
**वा छामि पुण्यपुरुषाचरितानि चेतुम्।।**[३५]

रघुवंशे–

**क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।**
**ततीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ।।**[३६]

भार्गवीयमहाकाव्ये–

**खं वायुमग्निमसुमिन्द्रयमंशुमन्तं**
**पथ्वीं जलं च हृदयं शशिनं तपश्च।**
**स्थानानि धातुरुदितानि निवासहेतौ**
**रुद्रस्य साम्प्रतमपि प्रथितानि लोके।।**[३७]

(श्लोकस्थपदानां पूर्वश्लोके विद्यमानया चकारेति क्रियया न्वयः)

श्रीमद्भागवते–

**हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही।**
**सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रे कतानि मे।।**[३८]

भार्गवीयमहाकाव्ये –

**न का निशि स्वप्नगतं च वत्रं ददर्श देवानथ ताडयन्तम्।**
**सुरांगणा वा शिशुरस्तु गेहे रुरोद भीत्या न जहास चापि।।**[३९]

नैषधीयचरिते –

**न का निशि स्वप्नगतं ददर्श तं  जगाद गोत्रस्खलिते च का न तम्।**
**तदात्मताध्यातध्वा रते च का चकार वा न स्वमनोभवोद्भवम्।।**[४०]

भार्गवीयमहाकाव्ये–

**वीणा मदंग-सुर दुन्दुभिभूषणानां घोषः**
**कलं दिशि दिशि प्रसतस्तदानीम्**
**रम्याणि वीक्ष्य  मधुराणि विलोक्य चाराद्**
**नोत्कण्ठितं भवति कस्य जनस्य चेतः।।**[४१]

अभिज्ञानशाकुन्तले–

**रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्**
**पर्युत्सुको भवति यत्सुखितो पिजन्तुः।**
**तच्चेतसा स्मरति नूनमबोधपूर्व**
**भावस्थिराणि जननान्तरसौहृदानि।।**[४२]

भार्गवीयमहाकाव्ये–

**या रावणादिशमनाय सुरर्थिता भूत या मन्थराश्रिततया वरदानबुद्धिः।**
**रामानुजाननगता पि च चित्रकूटे सा शारदा भवतु मे रसनाग्रसंस्था।।**[४३]

रामचरितमानसे–

**सारद प्रेरि तासु मति फेरी।**
**मागेसि नींद मास षट केरी।**

(बालकाण्डे–१७६दोहायाश्चौपाई–८)

**बिपति हमारि बिलोकि बडि मातु करिअ सोइ आजु।**
**रामु जाहिं बन राजु तजि होइ सकल सुरकाजु।।**
**नामु मंथरा मंदमति चेरी कैकइ केरि।**
**अजस पेटारी ताहि करि गई गिरा मति फेरि।।**

(अयोध्याकाण्डे–दोहा–११–१२)

**हिय सुमिरी सारदा सुहाई मानस ते मुखपंकज आई।**
**विमल विवेक धरम नय साली। भरत भारती मंजु मराली।।**[४४]

(अयोध्याकण्डे–२६६ दोहायाश्चौपाई–७–८)

एवं महाकाव्ये स्मिन् नैकस्थलेषु ग्रन्थान्तरप्रभावो द्रष्टुं शक्यते। एतावता भार्गवीयमहाकाव्यस्य काव्यशास्त्रीयं वैशिष्ट्यं संक्षेपतः प्रदर्शितं, विस्तरतस्तु तत्रैव द्रष्टुं शक्यते । तदयमत्र प्रस्तुतनिबन्धस्य।

**सारांशः-** विविधानवद्यविद्याविचक्षणैः श्रीमद्रामचन्द्रचरणारविन्दचञ्चरीकैः श्रीमद्भागवतादिपुराणपयोनिधिमथनोद्धतरमणीयकथासारहैय वीनवितरणा –प्यायिता नेकभागवतस्वान्तैः कविशिरोमणिभिः प्रो. मिथिलाप्रसादत्रिपाठि–भिर्विरचितं भार्गवीयं महाकाव्यं रघुवंशवन्नैकनायकमपि परशुरामप्रधान–नायकं, भगुवंशवर्णनपरं, वसन्ततिलकेन्द्रवज्रोपेन्द्रवज्रादिच्छन्दोरचित–नवत्यधिकषोडशशतश्लोकं, द्वात्रिंशत्सर्गात्मकम्, अभिव्यक्ता नेकरसमपि प्रधानवीररसं, रसानुगुणालङ्कारं, प्रसादगुणसम्पन्नं, श्रीमद्भागवत–वर्णितमुख्यमूलकथं, लक्ष्यमानग्रन्थान्तरप्रभावं नवीनं महाकाव्यम्। यद्यपि श्रीमद्भागवतादिपुराणेषु भगुकुलं वर्णितं तथापीह तदनेकग्रन्थ–समालोडनेनोद्धतविविधकथायोगेन नवीनं प्रतिभाति। ब्रह्मक्षत्रयोरैक्यं समुपदिशदिदं महाकाव्यं नैकविघटनकारिणि युगे स्मिन् प्रासङ्गिकम्। महाकाव्यमिदं देशसेवाव्रतं देशवासिनां जीवनस्य प्रधानं लक्ष्यं मन्यते। कविना तदभावे राष्ट्रस्य समद्धिरसम्भवा मता–

**स्वदेशसेवार्थमिदं शरीरं गहं च वस्तूनि यदा जनानाम्।**
**भवन्ति राष्ट्रस्य समद्धिरिष्टा तदा भविष्यत्यभिवर्द्धमाना।।**[४५]

एतादशे भार्गवीयमहाकाव्ये लभ्यमानानि महाकाव्यलक्षणध्वनि–गुणा लङ्काररीतिरूपकाव्यशास्त्रीयतत्त्वानि ग्रन्थान्तरप्रभावश्च कविपरिचयेन सह भार्गवीयमहाकाव्यस्य काव्यशास्त्रीयं वैशिष्ट्यमित्यभिधाने शोधपत्रे स्मिन् संक्षेपतः सोदाहरणं प्रदर्शितानि।

*सहायकाचार्यः (साहित्यविभागे)*
*राष्ट्रियसंस्कतसंस्थानम्, भोपाल परिसरः,*
*E-7/62 अरेरा कॉलोनी, भोपाल (म.प्र.)*

**सन्दर्भाः**

[१] सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।
नामास्य सर्गोपादेयकथया सर्गनाम तु।। साहित्यदर्पणः ६/३१५–३२५

[२] भार्गवीयम्–१६/४८–५०

[३] तत्रैव–१५/२१

[४] काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
कौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।। ध्वन्यालोकः–१/५

[५] भार्गवीयम् ८/५६

[६] तत्रैव१६/४८–५०

[७] तत्रैव१/५

[८] तत्रैव–१/२

[९] यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये।
विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भाख्यः।। सा.द. ३/२१४

[१०] भार्गवीयम् ५/२१–२४

[११] तत्रैव २१/२६–२६

[१२] वीरश्चतुर्धा,दान–दया–युद्ध–धर्मैस्तदुपाधेरुत्साहस्य चतुर्विधत्वात्। रसगङ्गाधरः–प. १६४

[१३] भार्गवीयम् ४/६–७

[१४] तत्रैव २/२२

[१५] तत्रैव ७/३३–३५

[१६] माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश । काव्यप्रकाशः –८/८६

[१७] भार्गवीयम् ५/३४

[१८] एतादशा बहवः प्रयोगा रामायणादौ दश्यन्ते।

[१९] भार्गवीयम् २०/८

[२०] उपकुर्वन्ति तं सन्तं ये ङ्गद्वारेण जानुचित्।
हारादिवदलंकारास्ते नुप्रासोपमादयः।। काव्यप्रकाशः –८/८८

[२१] भार्गवीयम् ५/१२

[२२] तत्रैव ७/४६

[२३] तत्रैव १२/३

[२४] तत्रैव ५/६

[२५] तत्रैव ११/१५

[२६] तत्रैव११/१६

[२७] तत्रैव ७/३

[२८] तत्रैव ५/६

[२९] तत्रैव ५/७
[३०] तत्रैव २/८
[३१] तत्रैव ६/१२–१३
[३२] तत्रैव १३/५१
[३३] तत्रैव १/५
[३४] तत्रैव ६/३३–३४
[३५] भार्गवीयम् १/५
[३६] रघुवंशम् १/२
[३७] भार्गवीयम् १/१२
[३८] श्रीमद्भागवतम्–३/१२/११
[३९] भार्गवीयम् ८/४५
[४०] नैषधीयचरितम् –१/३०
[४१] भार्गवीयम् –१५/८
[४२] अभिज्ञानशाकुन्तलम् ४/२२
[४३] भार्गवीयम्–१/४
[४४] रामचरितमानसम्
[४५] भार्गवीयम् ८/५६

———ooo———